# PAPER III

अधिकतम अंक 100

**खण्डः - 'क' ( अपठित-अवबोधनम् )** **(10)**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत -

क्रोधः मानवजीवनस्य शत्रुः अस्ति। क्रोधेन मानवः अनेकानि अनुचितकार्याणि करोति। अद्यत्वे वयं पश्यामः यत् क्रोधस्य कारणात् अनेके कलहाः भवन्ति। अनेनैव जनाः अन्येषां महतीं हानिम् अपि कुर्वन्ति। क्रोधेन शरीरे अनेके रोगाः भवन्ति। अनेन मनुष्यस्य विचारशक्तिः नष्टा भवति। क्रोधी जनः समाजे प्रतिष्ठां न लभते। परिवारस्य जनाः अपि तस्य सम्मानं न कुर्वन्ति। अनेन मित्रता अपि नश्यति, मित्राणि दूरं गच्छन्ति। क्रोधेन लाभः न भवति अपितु हानिरेव भवति। अतः क्रोधः न करणीयः।

I. एकपदेन उत्तरत - ½×4=2

(क) कः मानवजीवनस्य शत्रुः अस्ति?

(ख) क्रोधेन कस्य विचारशक्तिः नष्टा भवति?

(ग) के क्रोधेन अन्येषां महतीं हानिम् अपि कुर्वन्ति?

(घ) कस्य कारणात् कलहाः भवन्ति?

II. पूर्णवाक्येन उत्तरत - 1×2=2

(क) कः समाजे प्रतिष्ठां न लभते?

(ख) क्रोधेन मानवः किं करोति?

III. गद्यांशस्य उचितं शीर्षकं लिखत। 2×1=2

IV. निर्देशानुसारम् उत्तरत - 1×4=4

(क) 'हानिम्' इति पदस्य विशेषणपदं गद्यांशे किं प्रयुक्तम्?

(ख) 'मित्राणि दूरं गच्छन्ति' अस्मिन् वाक्ये 'गच्छन्ति' इति क्रियापदस्य कर्ता कः?

(ग) 'मित्रम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(घ) 'अनेन मित्रता अपि नश्यति' अस्मिन् वाक्ये अव्ययपदं किम्?



https://www.evidyarthi.in

## खण्डः - 'ख' ( रचनात्मक-कार्यम् ) (10)

2. मित्रं प्रति लिखिते पत्रे मञ्जूषायाः उचितपदानि चित्वा रिक्तस्थानानि पूरयत, पत्रं च उत्तरपुस्तिकायां लिखत। ½×10=5

प्रिय मित्र रमेश!

सादरं (1) ...............।

अत्र कुशलं (2) ...............। भवतः पत्रं (3) ...............। पत्रं पठित्वा अहम् अतीव (4) ............... अस्मि यत् भवान् (5) ............... संस्कृत-विषये शतम् अङ्कान् प्राप्तवान्। भवता लिखितम् आसीत् यत् भवान् नवमकक्षायां संस्कृतविषयं ग्रहीतुम् इच्छति। अहं तु कथयामि भवान् संस्कृतमेव (6) ...............। अद्य विदेशेषु अपि छात्राः (7) ............... पठन्ति। वैज्ञानिकाः, चिकित्सकाः, विद्वांसः च अस्य महत्त्वं (8) ............... संस्कृतं पठितुम् इच्छन्ति। संस्कृतस्य युगं पुनः आगच्छति। अतः (9) ............... पूर्वमेव सज्जाः भवेम।

भवतः (10) ...............

रोहितः

मञ्जूषा :

| |
|---|
| पठतु, नमः, वार्षिकपरीक्षायां, वयं, मित्रम् |
| प्राप्तम्, प्रसन्नः, तत्रास्तु, संस्कृतं, ज्ञात्वा |

3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत। 1×5=5



मञ्जूषा :

| |
|---|
| उद्यानम्, सरोवरः, वृक्षाः, खगाः, मेघः |
| आकाशे, तरति, हंसः, बालाः, मनोहरम् |



https://www.evidyarthi.in

## खण्डः – 'ग' ( अनुप्रयुक्तं व्याकरणम् ) (40)

4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णं वाक्यं लिखत – 1×4=4

(क) हिमालयः भारतस्य रक्षकः अस्ति।

(ख) सूर्य+उदये तमः नश्यति।

(ग) आचार्यः प्रत्येकं छात्रं प्रश्नं पृच्छति।

(घ) श्लोकवाचनं तथा+एव करणीयं यथा आचार्यः शिक्षयति।

5. कोष्ठकेषु प्रदत्तशब्दानाम् उचितरूपैः रिक्तस्थानानि पूरयित्वा पूर्णं वाक्यं लिखत – 1×5=5

(क) वने ........................ आश्रमः अस्ति। (साधु)

(ख) मम ........................ शिक्षिका अस्ति। (मातृ)

(ग) ........................ वनं प्रति गच्छन्ति। (मुनि)

(घ) ........................ बालस्य नाम श्रेयः अस्ति। (तत्)

(ङ) अहम् ........................ विद्यालये पठामि। (एतत्)

6. अङ्कानां स्थाने संस्कृत-सङ्ख्यावाचकं पदं प्रयुज्य पूर्णं वाक्यं लिखत – 1×4=4

(क) क्रीडाक्षेत्रे ........................ बालौ क्रीडतः। (2)

(ख) मार्गे ........................ जनाः धावन्ति। (95)

(ग) ........................ छात्राः पुस्तकमेलकं गच्छन्ति। (57)

(घ) वने ........................ मृगाः भ्रमन्ति। (78)

7. मञ्जूषातः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत पूर्णं वाक्यं च लिखत– 1×5=5

(क) ग्रामात् ........................ वनम् अस्ति।

(ख) यदा वृष्टिः भवति ........................ कृषकाः आनन्दिताः भवन्ति।

(ग) ........................ अहं संस्कृतं पठामि।

(घ) सत्यम् ........................ जयते।

(ङ) ........................ भारतस्य नाम आर्यावर्तः आसीत्।

मञ्जूषा – | अधुना, तदा, पुरा, एव, बहिः |

8. रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा लिखत – 1×4=4

(क) जनकः आपणात् मिष्ठान्नम् आनयति।

(ख) वानरः मनुष्यम् अनु+करोति।

(ग) अध्यापिका कक्षां प्रविशति।

(घ) कृषकः क्षेत्रात् गां नि+वारयति।



https://www.evidyarthi.in

9. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत – 1×5=5

(क) श्रान्तः पथिकः <u>वृक्षस्य</u> अधः विश्रामं करोति।

(ख) जनाः <u>नगरं</u> प्रति गच्छन्ति।

(ग) विद्वान् <u>वेदपाठे</u> निपुणः अस्ति।

(घ) <u>भोजनात्</u> अनन्तरं जलं न पातव्यम्।

(ङ) बालः <u>जनकेन</u> सह आपणं गच्छति।

10. अधोलिखितानां समस्तपदानां समासानां नामानि लिखत – ½×6=3

(क) प्रतिगृहम्

(ख) चक्रपाणिः

(ग) उपनगरम्

(घ) यथाशक्ति

(ङ) नीलकण्ठः

(च) दशाननः

11. कोष्ठकेषु प्रदत्तधातूनाम् उचितरुपैः रिक्तस्थानानि पूरयित्वा <u>पूर्णं वाक्यं लिखत</u> – 1×5=5

(क) त्वं सदा सत्यं ..................। (वद् – लोट्लकारे)

(ख) मृगाः सरोवरे जलं ..................। (पा – लट्लकारे)

(ग) छात्रः पुरस्कारम् ..................। (लभ् – लङ्लकारे)

(घ) वयं गृहकार्यं ..................। (कृ – लृट्लकारे)

(ङ) सः सुन्दरं लेखं ..................। (लिख् – विधिलिङ्लकारे)

12. अधोलिखितवाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा <u>पूर्णं वाक्यं</u> लिखत – 1×5=5

(क) छात्राः <u>पठ्+क्त्वा</u> आगच्छन्ति।

(ख) बालः <u>खेल्+तुमुन्</u> इच्छति।

(ग) नरः उच्चैः <u>हसितवान्</u>।

(घ) व्यासेन महाभारतं <u>लिखितम्</u>।

(ङ) कृषकः भोजनं <u>खादितुं</u> गृहं गच्छति।



https://www.evidyarthi.in

## खण्डः – 'घ' ( पठित-अवबोधनम् ) (40)

13. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 5

एकदा एकस्मिन् वने एकः श्रृगालः भोजनं प्राप्तुम् इतस्ततः भ्रमति स्म। तदैव सः मूषकाणां समूहं दृष्ट्वा तान् खादितुं चिन्तयति। तस्य मूषकसमूहस्य राजा हृष्टः पुष्टः आसीत्। श्रृगालः मूषकसमूहम् अनुसरति। तान् मूषकान् खादितुम् इच्छन् सः मूषकाणां बिलस्य समीपं गच्छति। सः श्रृगालः किञ्चित् चिन्तयित्वा मूषकाणां बिलात् बहिः सूर्यं प्रति उद्घाटितेन मुखेन तिष्ठति। अन्यस्मिन् दिवसे प्रातः मूषकाः श्रृगालं दृष्ट्वा चकिताः भवन्ति।

(I) एकपदेन उत्तरत – ½×2=1

(क) कः मूषकसमूहम् अनुसरति?

(ख) श्रृगालः किं प्राप्तुम् इतस्ततः भ्रमति स्म?

(II) पूर्णवाक्येन उत्तरत – 1×2=2

(क) मूषकान् खादितुम् इच्छन् श्रृगालः कुत्र गच्छति?

(ख) मूषकसमूहस्य राजा कीदृशः आसीत्?

(III) निर्देशानुसारम् उत्तरत – 2

(क) 'एकः श्रृगालः' अनयोः पदयोः विशेषणपदं किम्?

(ख) 'मूषकाः श्रृगालं दृष्ट्वा चकिताः भवन्ति' अस्मिन् वाक्ये 'भवन्ति' इति क्रियापदस्य कर्ता कः?

14. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 5

क्षुधासमं नास्ति शरीरपीडनम्
चिन्तासमं नास्ति शरीरशोषणम्।
विद्यासमं नास्ति शरीरभूषणम्
क्षमासमं नास्ति शरीररक्षणम्।

(I) एकपदेन उत्तरत – ½×2=1

(क) चिन्तासमं किं नास्ति?

(ख) विद्यासमं किं नास्ति?


evidyarthi
https://www.evidyarthi.in

(II) पूर्णवाक्येन उत्तरत - 1×2=2

(क) कया समं शरीरस्य रक्षणं नास्ति?

(ख) क्षुधासमं किं नास्ति?

(III) निर्देशानुसारम् उत्तरत - 1×2=2

(क) 'विद्यासमं शरीरभूषणम् न अस्ति' अस्मिन् वाक्ये 'अस्ति' इति क्रियापदस्य कर्ता क:?

(ख) 'कष्टम्' इति अर्थे श्लोके किं पदं प्रयुक्तम्।

15. अधोलिखितं नाट्यांशं पठित्वा प्रश्ननाम् उत्तराणि लिखत - 5

सर्वे छात्रा: कक्षायां परस्परं चर्चायां मग्ना: सन्ति। श्यमपट्टे एका सूक्ति: लिखिता अस्ति। 'गुणा: पूजास्थानं गुणिषु न च लिङ्गं न च वय:' (तदैव मान्यवर: संस्कृतस्य अध्यापक: कक्षां प्रविशति।)

सर्वे छात्रा: - (उत्थाय) वयं प्रणमाम: मान्यवर!

आचार्य: - सुखिन: भवन्तु। शुभपन्था:। तिष्ठन्तु।
(सर्वे उपविशन्ति। जिज्ञासया आचार्यं पश्यन्ति।)

आचार्य: - (सर्वान् दृष्ट्वा) किं भवन्त: किञ्चित् विशिष्टं कथयितुम् अथवा ज्ञातुम् इच्छन्ति?

सर्वे - (मिलित्वा) आम् मान्यवर! वयम् अस्माकम् पूर्वराष्ट्रपतिमहोदयानां जीवनस्य विषये ज्ञातुम् इच्छाम:। कृपया वदन्तु।

आचार्य: - अतीव शोभनम्। अवश्यमेव कथयिष्यामि। प्रारम्भे अहं कथयिष्यामि। मध्ये-मध्ये भवन्त: पृच्छन्तु। (श्यामपट्टं दृष्ट्वा सूक्तिं च पठित्वा) अतिशोभनम्। किम् एतदर्थम् एव इयं सूक्ति: अत्र लिखिता?

सवे - आम् मान्यवर!

(I) एकपदेन उत्तरत - ½×2=1

(क) के चर्चायां मग्ना: सन्ति?

(ख) गुणिषु के पूजास्थानम्?

(II) पूर्णवाक्येन उत्तरत - 1×2=2

(क) छात्रा: कथम् आचार्यं पश्यन्ति।

(ख) के विशिष्टं ज्ञातुम् इच्छन्ति?



https://www.evidyarthi.in

(III) निर्देशानुसारम् उत्तरत - 1×2=2

(क) 'मध्ये-मध्ये भवन्तः पृच्छन्तु' अस्मिन् वाक्ये 'भवन्तः' इति कर्तृपदस्य क्रियापदं किम्?

(ख) 'सामान्यम्' इति पदस्य विलोमपदं गद्यांशे किम् अस्ति?

16. मञ्जूषायां प्रदत्तैः पदैः रिक्तस्थानानि पूरयित्वा पूर्णं भावार्थं लिखत - ½×10=5

(क) सर्वस्य लोचनं शास्त्रम्।

भावार्थः - शास्त्राणां (1) .................. एव मनुष्यस्य (2) .................. नेत्रम् अस्ति। ज्ञानशक्त्या एव मानवस्य (3) .................. सिध्यन्ति। अतः (4) .................. ज्ञानं प्राप्तुं सदैव (5) .................. भवेयुः।

मञ्जूषा - | वास्तविकं, शास्त्राणां, कार्याणि, तत्पराः, ज्ञानम् |

(ख) अङ्गीकृतं सुकृतिनो न परित्यजन्ति।

भावार्थः - सज्जनाः (1) .................. स्वीकृत्य सम्पूर्णं (2) ..................। 'कार्यं (3) .................. अस्ति' इति (4) .................. कदापि (5) .................. न।

मञ्जूषा - | चिन्तयित्वा, कार्यं त्यजन्ति, कठिनम्, कुर्वन्ति |

17. अधोलिखितौ श्लोकौ पठित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा पूर्णम् अन्वयं लिखत - ½×10=5

(क) जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम्।।

अन्वयः - सत्सङ्गतिः धियः जाड्यं (1) .................., वाचि सत्यं (2) .................. मानोन्नतिं दिशति, (3) .................. अपाकरोति, चेतः (4) .................. दिक्षु कीर्तिं तनोति, कथय सत्सङ्गतिः (5) .................. किं न करोति?

(ख) पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः



https://www.evidyarthi.in

परोपकाराय सतां विभूतयः।।

अन्वयः - नद्यः स्वयम् एव अम्भः न (1) .................., वृक्षाः स्वयं (2) .................. न खादन्ति, (3) .................. सस्यं खलु न (4) .................. सतां विभूतयः (5) .................. (भवन्ति)।

18. अधोलिखितानि वाक्यानि कथाक्रमानुसारं संयोज्य पूर्णानि वाक्यानि लिखत। केवलं क्रमसङ्ख्या न लेखनीया - 1×4=4

(क) एकदा एकः नागरिकः महात्मानं रात्रिभोजाय निमन्त्रितवान्।

(ख) नागरिकः अतिथेः सूचनां प्राप्य अपि बहिः न आगतः।

(ग) किञ्चित् कालं प्रतीक्षां कृत्वा महात्मा स्वकुटीरम् आगच्छत्।

(घ) महात्मा नागरिकस्य निवेदनं स्वीकृत्य तस्य गृहम् अगच्छत्।

19. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा <u>पूर्णं वाक्यं</u> लिखत केवलं प्रश्नवाचकपदं न लेखनीयम्? 1×5=5

(क) महर्षिः दयानन्दः <u>फलानि</u> प्रेषयति।

(ख) <u>भारते</u> अनेके महापुरुषाः अभवन्।

(ग) <u>महात्मा</u> यथासमयं गृहं गतवान्।

(घ) <u>गुरोः</u> आज्ञया शिष्यः यात्रिणः समीपं गच्छति।

(ङ) <u>जनाः</u> विद्यया नम्रतां प्राप्नुवन्ति।

20. अधोलिखितानां पदानाम् उचितार्थैः सह मेलनं कृत्वा लिखत - 1×6=6

| | |
|---|---|
| (क) वाचि | (क) कुम्भः |
| (ख) जाड्यम् | (ख) ज्ञानम् |
| (ग) अनृतम् | (ग) अवलोक्य |
| (घ) घटः | (घ) वाण्याम् |
| (ङ) दृष्ट्वा | (ङ) असत्यम् |
| (च) विद्या | (च) मूर्खताम् |



https://www.evidyarthi.in